# श्री सोमनाथसंस्कृत-युनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा, अक्तुबर - 2019

| | | |
|---|---|---|
| **कक्षा – शास्त्री-1** | **सत्रम् – 1** | **गुणाः - 70** |
| **विषयः –** पौरोहित्यम् | **प्रश्नपत्रम् - 7 - CE - 1.1.1** | समयः- **11:30** तः **02:30** |
| **दिनाङ्कः- 16/10/2019** | **संदर्भग्रन्थः –** याज्ञवल्क्यस्मृतिः | |

**( प्रथमान्वितिः - युनिट-1 )**

**प्र-1 द्वयोः ससन्दर्भं व्याख्या कार्या। 10**

1. मातुर्यदग्रे जायन्ते द्वितीयं मौञ्जिबन्धनात्।
   ब्राह्मणक्षत्रियविशस्तस्मादेते द्विजाः स्मृताः ।।
2. सवर्णेभ्य: सवर्णासु जायन्ते हि सजातयः।
   अनिन्द्येषु विवाहेषु पुत्राः संतानवर्धनाः ।।
3. एकदेशमुपाध्याय ऋत्विग्यज्ञ कृदुच्यते।
   एते मान्या यथापूर्वमेभ्यो माता गरीयसी ।।

**प्र-2 कस्यचिदेकस्य विशदं वर्णनं कुरुत। 10**

1. वेदग्रहणाध्ययनफलं यथाग्रन्थं वर्णयत।
2. अष्टविवाहनामानि विलिख्य विवाहत्रयस्य लक्षणानि उपस्थापयत।

**( द्वितीयान्वितिः - युनिट-2 )**

**प्र-3 द्वयोः ससन्दर्भं व्याख्या कार्या। 10**

1. अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः।
   दानं दमो दया क्षान्तिः सर्वेषां धर्मसाधनम् ।।
2. गोब्राह्मणानलान्नानिनोच्छिष्टो न पदा स्पृशेत्।
   न निन्दाताडने कुर्यात्पुत्रं शिष्यं च ताडयेत् ।।
3. कुशाः शाकं पयो मत्स्याः गन्धाः पुष्पं दधि क्षितिः।
   मांसं शय्यासनं धानाः प्रत्याख्येयं न वारि च ।।

**प्र-4 कस्यचिदेकस्य विशदं वर्णनं कुरुत। 10**

1. गोदानफलं विवृणुत।
2. गृहस्य धर्मान् प्रतिपादयत।

**( तृतीयान्वितिः - युनिट-3 )**

**प्र-5 द्वयोः ससन्दर्भं व्याख्या कार्या। 10**

1. मृतेऽहनि प्रकर्तव्यं प्रतिमासं तु वत्सरम्।

प्रतिसंवत्सरं चैत्रमाद्यमेकादशेऽहनि ।।

2. धेनुः शङ्खस्तथानड्वान् हेम वासो हयः क्रमात् ।
   कृष्णागौरायसं छाग एता वै दक्षिणास्मृताः ।।

3. यथा ह्येकेन चक्रेण रथस्य न गतिर्भवेत् ।
   एवं पुरुषकारेण विना दैवं न सिद्ध्यति ।।

**प्र-6 कस्यचिदेकस्य विशदं वर्णनं कुरुत। 10**

1. राज्याङ्गानि यथाशास्त्रं निरूपयत।
2. कीदृशं पुरोहितं कुर्यात् - इति यथाशास्त्रं विवृणुत।

**प्र-7 दशानां लघूत्तराणि लिखत। 10**

1. प्रतिवेदं ब्रह्मचर्यस्य कालः कः
2. विवाहस्य कति प्रकाराः प्रतिपादिताः
3. विवाहप्रकरणेऽस्मिन् कति श्लोकाः सन्ति
4. क्षत्रियस्त्रिया वैश्येनोत्पन्नस्य संज्ञा का
5. गृहस्थेन श्रौतकर्मादि कस्मिन्नग्नौ कर्तव्यः
6. महामखाः कति सन्ति
7. क्षत्रियस्य प्रधानकर्तव्यं किमस्ति
8. चान्द्रायणव्रतं कदा चरेत्
9. लोहधातोः शुद्धिः केन द्रव्येण भवति
10. सपिण्डिकरणे कति पात्राणि भवन्ति
11. अक्षय्योदकदानस्य श्लोकं लिखत।
12. के पञ्चनरवाः भक्षणयोग्याः सन्ति
13. सायंकालीन सन्ध्योपासना कस्यां दिशि कर्तव्या
14. चुतर्वर्णानां नामानि लिखत।
15. याज्ञवल्क्यस्मृतौ प्रथमाध्यायस्य नाम किम्

***************